अनुक्रंमाक | | | | | | | | |

105

# प्रतिदर्श प्रश्नपत्र

## 2023

## संस्कृतम्

अवधिः— होरा त्रयम् ] [ पूर्णांकाः :— 80

खण्ड — 'क' (अपठितांश— अवबोधनम्)

1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत—
(निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर लिखिए।)

भारतवर्षस्य उत्तरप्रदेशराज्ये प्रयागस्य विशिष्टं स्थानमस्ति। अत्र ब्रह्मणः प्रकृष्टयागकरणात् अस्य नाम प्रयागः अभवत्। गंगा — यमुनयोः संगमे सितासितजले स्नात्वा जनाः विगतकल्मषाः भवन्ति इति जनानां विश्वासः। अमायां पौर्णमास्यां संक्रान्तौ च स्नानार्थिनामत्र महान् सम्मर्दः भवति। प्रतिवर्षं मकरं गते सूर्ये माघमासे तु अनेकलक्षाः जनाः अत्र आयान्ति मासमेकमुषित्वा च संगमस्य पवित्रेण जलेन, विदुषां महात्मनामुपदेशामृतेन च आत्मानं पावयन्ति। अस्मिन्नेव पर्वणि महाराजः श्रीहर्षः प्रतिपंचवर्षम् अत्रागत्य सर्वस्वमेव याचकेभ्यो दत्त्वा मेघ इव पुनः संचयार्थं स्वराजधानीं प्रत्यगच्छत्।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिए) — $\frac{1}{2}$x4=2

(i) भारतवर्षस्य उत्तरप्रदेशराज्ये कस्य विशिष्टं स्थानमस्ति?

(ii) स्नानार्थिनां महान् सम्मर्दः कदा भवति?

(iii) कस्मिन् मासे अनेकलक्षाः जनाः प्रयागं प्रति आगच्छन्ति ?

(iv) महाराजः श्री हर्षः कुत्र आगत्य याचकेभ्यो सर्वस्वं ददाति?

(ख) पूर्ण वाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए) — 1x2=2

(i) प्रयागः नाम किमर्थमभवत् ?

(ii) कस्मिन् जले स्नात्वा जनाः विगतकल्मषाः भवन्ति ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत ( निर्देशानुसार प्रश्नों के उत्तर दीजिए) — 1x3=3

(i) 'प्रत्यगच्छत् ' इति क्रिया पदस्य कर्तृपदं लिखत ।

(ii) अनुच्छेदाच्चित्वा द्वौ अव्यय पदं लिखत।

(iii) जलेन पदस्य विशेषण पदं लिखत।

(घ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत । — 1
(इस गद्यांश के लिए समुचित शीर्षक लिखिए) —

### खण्ड — 'ख' (संस्कृतेन रचनात्मकं कार्यम्)

2. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयित्वा प्रार्थनापत्रम् उत्तरपुस्तिकायां लिखत। $\frac{1}{2}$x8=4
(मञ्जूषा से उचित पद चुनकर रिक्त स्थानों की पूर्ति कर प्रार्थनापत्र उत्तरपुस्तिका में लिखिए।)

| महोदय, मह्यम, असमर्थः, सेवायाम्, क ख ग, यत्, भविष्यति, अवकाशं, |
|---|

(i)..........................

प्रधानाचार्यः

वरिष्ठ माध्यमिक विद्यालयः

रामनगरम् (नैनीतालः)।

(ii)...............................!

सविनयं विनिवेद्यते (iii)..................विगतरात्रितः अहं ज्वरपीडितः अस्मि।विद्यालयमागन्तुं (iv)......................अस्मि।

अतः (v).............. 07—12—2022 — 09—12—2022 पर्यन्तम् (vi).............. स्वीकृत्य माम् अनुगृहणन्तु।

महती कृपा (vii)......................... ।

भवदाज्ञानुवर्ती

3. मञ्जूषायां प्रदत्त शब्दसूची साहाय्येन अधोलिखितां लघुकथां पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत। $\frac{1}{2}$ x 8=4

(मंजूषा में दिये गये शब्दों की सहायता से निम्नलिखित लघुकथा को पूर्ण कर उत्तरपुस्तिका में पुनः लिखिये।)
कस्मिंश्चिदधिष्ठाने .......... ब्राह्मणाः परस्परं मित्रत्वमापन्ना वसन्ति स्म।बालभावे तेषां मतिरजायत 'भोः देशान्तरं ... ... विद्योपार्जनं क्रियेत' इति। अथान्यस्मिन् .......... ते परस्परं निश्चयं कृत्वा विद्योपार्जनार्थ कान्यकुब्जं गताः। तत्र च विद्यामठे पठन्ति ...... । एवं द्वादशाब्दानि यावत् एकचित्ततया .......... विद्याकुशलास्ते सर्वे सञ्जाताः। ततस्तैश्चतुर्भिः मिलित्वा उक्तम् –'अधुना .......... सर्वे विद्यापारङ्गताः ' तदुपाध्यायस्य ......... लब्ध्वा स्वदेशं गच्छामः।' एवं मन्त्रयित्वा तथैवानुष्ठीयताम् इत्युक्त्वा उपाध्यायस्यानुज्ञां पुस्तकानि च नीत्वा यावत् कञ्चित् मार्ग.. ........ तावद् द्वौ पन्थानौ समायातौ।

| स्म, चत्वारो, गच्छन्ति , वयं , दिवसे, अनुज्ञां , गत्वा, पठित्वा |
|---|

4. अधोलिखितेषु एकं विषयमधिकृत्य चत्वारो वाक्यं संस्कृतभाषायां लिखत? 4

(नीचे लिखे किसी एक विषय पर चार वाक्यों को संस्कृतभाषा में लिखिए।)

(i) विद्याधनं सर्वधनं प्रधानम् (ii) परोपकारः
(iii) सत्संगतिः (iv) कविकुलगुरूः कालिदासः

## खण्ड – 'ग' (अनुप्रयुक्त व्याकरणम्)

5. अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु सन्धि–विच्छेदं कुरूत– 1x5=5
(निम्नलिखित वाक्यों में रेखाङ्कित पदों में सन्धि–विच्छेद कीजिए)

(i) यान्यनवद्यानि कर्माणि तानि सेवितव्यानि।
(ii) जगच्चक्षुषि भास्करे।
(iii) गम्भीरस्वरेणैवम् अवादीत्।
(iv) भिक्षावटुनानुगम्यमानः संन्यासी दुष्टः।
(v) कठोरभाषणैस्तिरस्करोषि।

6. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां विग्रहाः लेखनीयाः– 1x5=5
(निम्नलिखित वाक्यों में रेखाङ्कित पदों का विग्रह कीजिए)
(i) मधुरवचांसि श्रुत्वा कस्य यूनो हृदयं उत्कष्ठितं न भविष्यति।
(ii) राजकुमारी मदालसा सर्वविद्यानिष्णाता जाता।
(iii) पञ्चोपचारमिव इव पूजनमस्ति मातुः ।
(iv) आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
(v)या प्रत्यहं किल तदा मतिमाननीयाम्।

7. निम्नेलिखितेषु वाक्येषु कोष्ठकान्तर्गत प्रकृति – प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत– 1x6=6
(निम्नलिखित वाक्यों में कोष्ठक के अन्तर्गत प्रकृति के साथ निर्दिष्ट प्रत्यय जोड़कर खाली स्थान भरिए)

(i) आचार्याय प्रियं धनम् ......................। (आ + हृ + ल्यप्)
(ii) न त्वं ...............................अर्हसि । (शुच् + तुमुन्)
(iii) तदन्वये शुद्धमति .........................। (प्र + सू + क्त )
(iv) भोजो भुवनेश्वरी विपिने .................... । (हन् + तव्यत् )
(v) स्वाधीनताऽऽर्यभुवि .................... समाना । (मूर्ति + मतुप् स्त्री0)

(vi) प्रवृत्तिं च ..........................च जना न विदुरासुराः। (नि + वृत् + क्तिन् )

8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम् – 1x4=4

(निम्नलिखित वाक्यों में कर्ता और क्रिया पदों की अन्विति कीजिए)

(i) चिरं श्लेषः कालेन न..........................। (भविष्यसि / भविष्यति )

(ii) ................................खल्वस्मत्पक्षपातादेव नार्थमवेक्षते । (त्वम् /भवान्)

(iii) किं कोऽपि न ............................रात्रौ। (प्रविशति/ प्रविशसि )

(iv) ..................... किंचिद् वक्तुकामोऽस्मि । (अहम् / वयम् )

9. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गतशब्देषु उपपदविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत– 1x4=4

(नीचे लिखे वाक्यों में कोष्ठक में दिये गये शब्दों के साथ उपपद विभक्ति का प्रयोग करके रिक्त स्थान भरिए )

(i) एकेनापि विद्यायुक्तेन साधुना सुपुत्रेण सर्व कुलं आह्लादितं यथा.........................शर्वरी। (चन्द्र)।

(ii) तासां .............................जन्महेतवः आसन्। (पितृ)

(iii) सिन्धुलस्य वार्धक्ये भोज इति पुत्रः ............................। (भू + लङ् )

(iv) मुञ्जो राज्यलोभाद्विषादिना..................... । (मृ + लृट् )

## खण्ड – 'घ' (पठितांश अवबोधनम् भाग–I)

10. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत–

(नीचे लिखे गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिये)

पुरा धाराराज्ये सिन्धुल – संज्ञो राजा चिरं प्रजाः पर्यपालयत्। तस्य वार्धक्ये भोज इति पुत्रः समजनि। सः यदा पञ्चवार्षिकस्तदा पिता ह्यात्मनो जरां ज्ञात्वा मुख्यामात्यानाहूयानुजं मुञ्जं महाबलमालोक्य पुत्रं च बालं संवीक्ष्य विचारयामास–यद्यहं राज्यलक्ष्मीभारधारणसमर्थं सहोदरमपहाय राज्यं पुत्राय प्रयच्छामि, तदा लोकापवादः। अथ वा बालं मे पुत्रं मुञ्जो राज्यलोभाद्विषादिना मारयिष्यति तदा दत्तमपि राज्यं वृथा। पुत्रहानिर्वंशोच्छेदश्च इति विचार्य राज्यं मुञ्जाय दत्त्वा तदुत्सङ्गे भोजमात्मानं मुमोच।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिए) $\frac{1}{2}$x2=1

(i) धाराराज्ये को राजा प्रजाः चिरं पर्यपालयत ?

(ii) सिन्धुलःकस्मै राज्यम् अयच्छत् ?

(ख) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए) 1

(i) भोजः कस्य पुत्रः आसीत् ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए) 1x3=3

(i) गद्यांशे 'क्रोडे' इति पदस्य समानार्थी पदं किं प्रयुक्तम् ?

(ii) 'दत्तम्' पदे कः प्रत्ययः ?

(iii) 'तस्य वार्धक्ये भोज इति पुत्रः समजनि' अत्र 'तस्य' सर्वनामपदःकस्मै प्रयुक्तम् ?

11. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत –

(नीचे लिखे नाट्यांश को पढ़कर प्रश्नों के उत्तर दीजिए)

(ततः प्रविशति प्रकृतिसौन्दर्यमवलोकयन् महाराजस्य शत्रुजितः पुत्रः ऋतध्वजः)

ऋतध्वजः – अहो शोभनं गन्धर्वराजविश्वावसोः राजोद्यानम्। आम्रञ्जरीणां परां शोभां दृष्ट्वा कोकिलानां च मधुरवचांसि श्रुत्वा कस्य यूनो हृदयं सहसा उत्कण्ठितं न भविष्यति ?
वामपार्श्वे रमणीनामालाप इव श्रूयते। अत्रैव स्थित्वा श्रोष्यामि।

कुण्डला – सखि मदालसे! त्वं तु केवलं विद्याध्ययने एव रता कियन्तं कालं यावत् ब्रह्मचर्यव्रतं धारयिष्यसि?

मदालसा – ज्ञानोदधिस्तु अनन्तपारो गभीरश्च। मया सागरतटे स्थित्वा कतिपयबिन्दव एव प्राप्ता अद्यावधि।

कुण्डला – विनयशीले! विद्या ददाति विनयम् अत एव एवं भणसि । कुलगुरु–तुम्बरुमहाभागैस्तु गन्धर्वराजाय अन्यदेव सूचितम्।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिए)– $\frac{1}{2}$x2=1

(i) उद्यानः कस्य आसीत् ?

(ii) रमणीनामालापः कुत्र श्रुयते ?

(ख) पूर्ण वाक्येन उत्तरत (पूर्णवाक्य में उत्तर दीजिए)– 1

(i) ज्ञानोदधिस्तु कीदृशः अस्ति ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए)– 1x3=3

(i) 'राजोद्यानम्' पदे सन्धिविच्छेदं कुरुत ?

(ii)) नाट्यांशात् 'क्त्वा' प्रत्ययान्तपदं (कोऽपि द्वौ) चिनुत ?

(iii) 'त्वं तु केवलं विद्याध्ययते एव रता ' अत्र 'त्वं ' सर्वनामपदं कस्मै प्रयुक्तम् ?

12. अद्योलिखितौ श्लोकौ पठित्वा प्रश्नान् उत्तरत –
(नीचे लिखे श्लोकों को पढ़कर प्रश्नों के उत्तर दीजिए)–

कर्णामृतं सूक्तिरसं विमुच्य दोषेषु यत्नः सुमहान् खलानाम् ।
निरीक्षते केलिवनं प्रविश्य क्रमेलकः कण्टकजालमेव ।।

उत्साह–सम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढसौहृदं च लक्ष्मीः स्वयं याति निवासहेतोः ।।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिए)– $\frac{1}{2}$x2=1

(i) खलनां– केषु यत्नः भवति ?

(ii) कः कण्टकजालं पश्यति ?

(ख) पूर्ण वाक्येन उत्तरत (पूर्णवाक्य में उत्तर दीजिए)– 1

(i) लक्ष्मीः निवासहेतोः कुत्र याति ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए)– 1x3=3

(i) 'व्यसनेष्वसक्तम्' पदे सन्धिविच्छेदं कुरुत ?

(ii) 'विमुच्य' पदे प्रकृति प्रत्यय निर्देशं कुरुत ?

(iii) 'निरीक्षते' पदस्य कर्तृपदं लिखित ?

13. निर्देशानुसारं प्रश्नान् उत्तरत –
(निर्देशानुसार प्रश्नों के उत्तर दीजिए)–

(क) सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः।

(i) उपर्युक्त पंक्तिः पाठ्यपुस्तकस्य कस्मात् पाठात् उद्धृताः ? $\frac{1}{2}$

(ii) एषा पक्तिः मूलरूपेण कस्मात् ग्रन्थात् संकलिताः ? $\frac{1}{2}$

(ख) यद्यपि देवादेशः प्रमाणम्,पुनरपि किञ्चिद् वक्तुकामोऽस्मि,सापराधमपि मे वचः क्षन्तव्यम्।देव! पुत्रवधो न कदापि हिताय भवतीति।

(i) एषा पंक्तिः मूलरूपेण कस्मात् ग्रन्थात् उद्धृतः, अस्य लेखकश्च कः ? $\frac{1}{2}+\frac{1}{2}=1$

14. अधोप्रदत्त भावार्थत्रये शुद्ध भावार्थस्य चयनं कृत्वा लिखत–
(नीचे दिये गये क, ख खण्डों में, प्रत्येक के तीन भावार्थो में से शुद्ध भावार्थ का चयन कर लिखिए)–

(क) 'नैकेनापि समं गता वसुमती नूनं त्वया यास्यति' 1+1=2

(i) इयं धरित्री त्वया सह यास्यति।

(ii) इयं धरित्री केनापि सह न गता, त्वया सह अवश्यमेव यास्यति।

(iii) इयं धरित्री त्वया सह न यास्यति।

(ख) त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः

(i) आत्मनः नाशाय त्रिविधिं नरकस्य द्वाराणि भवन्ति।

(ii) नरकस्य त्रिविधं द्वाराणि भवन्ति।

(iii) नरकस्य द्वाराणि के भवन्ति ?

अथवा

अधोदत्तश्लोकस्य प्रदत्तं भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा लिखत–

(नीचे दिये गये श्लोक के भावार्थ को मञ्जूषा में दिये गये पदों से पूर्ण करके लिखिए )। $\frac{1}{2}$x4=2

शरीरेऽरिः प्रहरति हृदये स्वजनस्तथा।
कस्य स्वजनशब्दो मे लज्जामुत्पादयिष्यति।

(i) ..................शरीरस्योरपरि प्रहारं करोति तथा स्वजनाः(ii) ............................प्रहरति.।
कस्यार्थं स्वजनशब्दः(iii) ..........................यः.(iv) ..............................लज्जितं करोति ।।

| मर्मस्थाने, शत्रुः, मह्यम, प्रयुक्तः |
|---|

15. अधोलिखित श्लोकद्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत –

(नीचे दो श्लोकों का अन्वय दिया गया है। उनमें रिक्त स्थानों की पूर्ति करके अन्वय पुनः लिखिए)।

(क) यस्याः शक्रसमो भर्ता मया पुत्रवती च या । $\frac{1}{2}$x4=2
फले कस्मिन् स्पृहा तस्या येनाकार्य। करिष्यति ।।

अन्वयः – यस्याः भर्ता (i)............................. मया च या (ii)............................. अस्ति (iii) ..........................

.

कस्मिन् फले स्पृहा येन(।v) ........................करिष्यति।

(ख) त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्। $\frac{1}{2}$x4=2
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ।।

अन्वयः – (रघवंशिनः) सम्भृतार्थानां (i) .......................... मितभाषिणाम (ii)................................
विजिगीषूणां. (iii)............................... गृहमेधिनाम् (iv).............................(अभवन्)।

16. अधोलिखितानां 'अ' स्तम्भस्य वाक्यांशानां 'ब' स्तम्भस्य वाक्यांशैः सह उचित मेलनं कुरुत–

(निम्नलिखित 'अ' स्तम्भ में प्रदत्त वाक्यांशों का 'ब' स्तम्भ में दिए गये वाक्यांशों के साथ उचित मिलान कीजिए) $\frac{1}{2}$x4=2

| स्तम्भ 'अ' | स्तम्भ 'ब' |
|---|---|
| (क) आकारसदृशप्रज्ञः | (i) द्वारं नाशनमात्मनः |
| (ख) अनेकसंशयोच्छेदि | (ii) नूनं त्वया यास्यति |
| (ग) नैकेनापि समं गता वसुमती | (iii) प्रज्ञया सदृशागमः |
| (घ) त्रिविधं नरकस्येदं | (iv) परोक्षार्थस्य दर्शकम् |

17. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितार्थं कोष्ठकात् चित्वा लिखत– 1x3=3

(अधोलिखित वाक्यों में रेखांकित शब्दों के प्रसङ्गानुसार उचित अर्थ कोष्ठक से चुनकर लिखिये।)

(क) अल्पज्ञ एवं पुरुषःप्रलपित अजस्रं। (निरन्तरं / यदा–कदा)

(ख) शरीरे अरिः प्रहरति । (मित्रम् / शत्रुः)

(ग) पिको वसन्तस्य गुणं न वायसः । (काकः / मयूरः)

## खण्ड – 'घ'(संस्कृत साहित्य–परिचयः भाग–।।)

18. अधोलिखितानां कवीनां देशकालकृतीनां यथानिर्देशं नामानि लिखत–

( निम्न लिखित कवियों के देश, समय और रचनाओं के नाम निर्देशानुसार लिखिये)–

(क) कवयः 1x2=2

(i) कालिदासः<br>(ii) वेद कुमारी घई } देशः

(ख) कवयः 1x2=2

(i) अम्बिका दत्त व्यासः<br>(ii) अश्वघोषः } कालः

(ग) कवयः 1x4=4

(i) भर्तृहरिः<br>(ii) बाणभट्टः<br>(iii) भासः<br>(iv) ईशदत्त शास्त्री } काऽपि एका रचना

अथवा

(क) निम्नप्रदत्तवाक्येषु कोष्ठकेभ्यः चित्वा उचित शब्दैः रिक्तस्थानपूर्तिः क्रियताम्। 1x4=4

(नीचे दिये गये वाक्यों में कोष्ठकों से चुनकर उचित शब्दों से रिक्त स्थान की पूर्ति कीजिए।)

(i) 'रघुवंशम्' ग्रन्थस्य रचयिता......................अस्ति। (कालिदासः / वाल्मीकिः / व्यासः)

(ii) 'महाभारतम्' ग्रन्थस्य रचयिता......................अस्ति। (व्यासः / भवभूतिः / भास :)

(iii) 'भोजप्रवन्धम्' रचनाकारः......................अस्ति। (दण्डी / अम्बिकादत्त व्यासः / बल्लालसेनः)

(iv) 'शिवराजविजयम्' संस्कृतसाहित्यस्य प्रथमः..................अस्ति।(महाकाव्यम् / कथासाहित्यः / उपन्यासः)

(ख) महाकाव्यस्य चत्वारो विशेषताः लिखत। 4

(महाकाव्य की चार विशेषताएं लिखिए।)